यवन जातक of some unknown scholar – Ed. and pub. by बाबू वाराणसी प्रसाद at काशी संस्कृत प्रेस. Benares, 1931 Vikram era.

(121)

1536

Bill No. 3/07-08
92
2008-0246

Indira Gandhi National
Centre for the Arts

अथयवनजातकंप्रारभ्यते

Indira Gandhi National
Centre for the Arts

1536

SANS
133.5
YAV

DATA ENTERED
Date 2/9/08

KALANIDHI
Rare Book Collection
ACC No.: R-246
IGNCA Date: 25.3.08

य.जा. ॥श्रीगणेशायनमः॥ अथयवनजातकप्रारंभः॥अथपत्रिकादौआशीर्वादश्लोकाः॥ सजयति०॥
१ १॥ यस्योदयास्तसमये०॥२॥ श्रीमत्पंकजिनीपतिःकुमुदिनीप्राणेश्वरोभूमिभूः शशांकिः सुररा
जवंदितपदोदैत्येंद्रमंत्रीशनिः॥स्वर्भानुःशिखिनांगणोगणपतिर्ब्रह्मेशलक्ष्मीधरास्तेरक्षंतुसदै
वयस्यविमलापत्रीमयालिख्यते॥३॥ आयुःश्रीसुखकांतिकीर्त्तिजननीमांगल्यपुष्टिप्रदापुण्याहे
विदितेसखेचरगणालेख्यापटेपत्रिका॥दैवज्ञेनसुबुद्धिनाविरचिताजन्मादिसंसारिताज्ञातेजन्म
निपूर्वजंकलमलंपत्रीमयालिख्यते॥४॥गणनाथेरविमुख्यखेचराःकुलदेवीविधिविष्णुशंकरा
॥उदयांशाधिपतिप्रकुर्वतांचिरमायुःखलुयस्यपत्रिका॥५॥यस्यनास्तिखलुजन्मपत्रिकाया
शुभाशुभफलप्रकाशिनी॥अंधकंभवतितस्यजीवितं दीपहीनमिवमंदिरंनिशि॥६॥यदुपचित राम.
मन्यजन्मनि शुभाशुभंतस्यकर्मणःप्राप्तिं॥व्यंजयतिशास्त्रमेतत्तमसिद्रव्याणिदीपमिव॥७॥विधा १

त्रा लिखिता या सा ललाटे क्षरमालिका ॥ दैवज्ञस्तां पठेत्प्राज्ञो होरानिर्मलचक्षुषा ॥ ८ ॥ नमया विधितं यंत्रं नम्रयास्या पिता घटि ॥ परोपदिष्टवेलायां लिख्यते जन्मपत्रिका ॥ ९ ॥ आदित्याद्या ग्रहाः सर्वे सनक्षत्राः सराशयः ॥ सर्वान् कामान्प्रयच्छंतु यस्यैषा जन्मपत्रिका ॥ १० ॥ असौ देवद्विजकुलदेव्याः प्रसादाद्दीर्घायुर्भूयात् ॥ ॥ स्वस्तिश्री नृपशालीवाहनशाके ॥ अमुकसंवत्सरे ॥ अमुकायने ॥ अमुकऋतौ ॥ अमुकमासि ॥ अमुकपक्षे ॥ अमुकतिथौ ॥ अमुकवासरे ॥ अमुकजन्मनक्षत्रे ॥ अमुकचरणे ॥ अमुकयोनौ ॥ अमुकगणे ॥ अमुकनहानक्षत्रे ॥ सूर्यर्क्षात्पुरुषाकारचक्रे ॥ अमुकस्थाने पतितं ॥ ॥ फलं ॥ ॥ अमुकप्राप्तिः ॥ अमुकराशिस्थिते चंद्रे ॥ अमुकराशिस्थिते सूर्ये ॥ अमुकयोगे ॥ अमुककरणे ॥ एवं पंचांगशुद्धौ तद्दिने दिवा रात्रौ वा ॥ अमुकलग्नवहमाने ॥ लग्नाधीपे अमुके ॥ राश्याधिपे अमुके ॥ अमुकांशे ॥ अमुकद्रेष्काणे ॥ एवं शुभग्रहावलोकितकल्याणोदयवेलायां श्रीमद्रमोमारमणच

प॰जा॰ रणसेवापरांगतः करणेराजमान्यराजेश्री अमुकानांभार्याउभयकुलानंददायिनीरमणीयंपुत्ररत्नंकन्या
२ रत्नंवाप्रासूत ॥अस्याभिधानमवकहडचक्रेअमुकनामप्रतिष्ठितं॥ असौदेवद्विजकुलदेव्याः प्रसा
दाद्दीर्घायुर्भूयात्॥अथास्यप्राकृतंजन्मकाललिख्यंते॥अस्यजन्ममासोअमुकः॥जन्मतिथीअमु
का॥ जन्मनक्षत्रंअमुकं॥जन्मराशिअमुकः॥अथास्ययात्रादौवर्ज्यं॥घातवारतिथीनक्षत्रचंद्रे
चलेख्याः॥ अथजातस्यजंतोःषट्धिष्ण्यानि॥जन्मभाद्दशमं१० कर्मभंसांघातंषोडशभं१६ अष्टा
दशं१८ सामुदायंत्रयोविंश२३ विनाशभं॥मानसर्क्षंपंचविंशं २५ षट्नक्षत्रंप्रकीर्तितं॥ एतेषुनक्ष
त्रेषुषट्सुपापग्रहाधिष्ठितेषुसत्सुपीडाभवेत्॥तच्छांत्यैदानंजपहोमौवसकारयेत्॥अथजन्म
समयेतत्कालिकाग्रहाः॥सलग्नालिख्यंते॥ग्रहान्संलेख्य ॥ग्रहचक्रंकार्यं॥तद्यथालग्नात्द्वादश राम
राशिषुग्रहाःरव्यादयस्थाप्याः॥अथजातस्यबालस्यपंचांगफलानिलिख्यंते॥तत्रादौसंवत्सर २

फलं॥प्रभवादिकजातानांनराणांयवनैस्फुटं॥फलंक्रमेणतत्सर्वंकथ्यतेचाथशोभनंसंग्रहःसर्व
वस्तूनांपुत्रसंपत्तिमेवच॥दीर्घायुर्भोगसंपन्नःप्रभवेजायतेनरः॥१॥उत्पन्नंभोगभोगीस्यात्कलावां
श्चारुदर्शनः॥पंडितोराजपुत्रश्चविभवेब्देनरोभवेत्॥२॥सुभगःकांतिमान्भोगीपुत्रदारसमन्वितः॥
विद्वान्सर्वगुणोपेतःशुक्लसंवत्सरेनरः॥३॥सदानंदपरःसत्यवादीपरहितेरतः॥गुणीख्यातःसुखीमा
नीप्रमोदेजायतेनरः॥४॥प्रजानांपालकोधर्मीकृपासत्यसमन्वितः॥देवब्राह्मणभक्तश्चप्रजापतिस
मुद्भवः॥५॥कांतश्रीमान्सुखीमानीगीतप्रियश्चवल्लभः॥दीर्घायुर्बहुपुत्रस्यादंगिरावत्सरेभवे
त्॥६॥श्रीमान्शुभमतिःशास्त्रपरागःसुहृत्प्रियः॥बलवान्कीर्तिमांश्चैवजायतेश्रीमुखेनरः॥७॥
भावसंवत्सरेजातोनरोभवतिसौख्यभाक्॥यशस्वीदाननिरतःसर्वलक्षणसंयुतः॥८॥कांतिःस
र्वगुणोपेतोदीर्घायुर्दानतत्परः॥ख्यातःशुभमतिश्चैवयुवाब्देपुरुषोभवेत्॥९॥व्यापारकुशलो

Centre for the Arts

 भूपमानीशत्रुनिबर्हणः॥अरोगीधनलुब्धश्चधातावर्षेनरोभवेत्॥१०॥समर्थःसर्वलोकेषुगुरुभ
 क्तोतिसुंदरः॥ईश्वरेजायतेमर्त्यःसदाक्रोधपरायणः॥११॥वणिक्कृषिबलग्रामकर्ताधान्यधनै
र्युतः॥जायापुत्रसुहृद्भिश्चबहुधान्येप्रजायते॥१२॥सेनानीर्नृपतेर्मंत्रीरथध्वजैःसुकीर्त्तितः॥शा
स्त्रसंग्राहगश्चैवप्रमाथीवत्सरे भवेत्॥१३॥उग्रःप्रतापशीलश्चपररागविमर्द्दनः॥पापकर्मर
तःशूरोविक्रमेब्देनरोभवेत्॥१४॥मंदोलसोहास्यसुखोभारवाहःकृषीवलः॥परकर्मरतोनिस्वंवृ
षाब्देबालकोभवेत्॥१५॥चित्रभानुसमुद्भूतोनरोविद्यामतिर्भवेत्॥नीतिमान्बुद्धिमान्श्रीमा
न्स्वामिभक्तःप्रियंवदः॥१६॥पिंगदृक्पिंगकेशीन्चगोस्वल्पश्चविभूत्तमः॥सुभानुवत्सरेजातः
कांतिमानतिदुर्जनः॥१७॥चंचलोचपलोहृष्ट स्तारणेब्देनरोभवेत्॥धूर्तःपापरतःक्रूरोदरिद्री 
निष्ठुरःसदा॥१८॥मृदुभाषीराजमानीराजसःशुभलक्षणः॥प्रभुर्धनसमृद्धिश्चपार्थिववत्स 

रेनरः ॥१९॥ द्यूतमद्यपरस्त्रीणां व्यसनैर्धनवर्जितः ॥ व्ययसंवत्सरे सर्वचौरपापमतिर्भवेत् ॥२०॥
स्वकर्मनिरतः शास्त्रपारगोतिविचक्षणः ॥ ह्रस्वः स्थूलतनुः श्यामः सर्वजित्संभवोनरः ॥२१॥ बहुभृत्य
धनीकामी भोगीमिष्टान्नभुक्लघुः ॥ सर्वधारिजातनरः सर्वाधारपरो भवेत् ॥२२॥ कुटुंबकलहः क
र्तापरदेशरतः सदा ॥ सर्वलोकविरोधी च विरोधी वर्षसंभवः ॥२३॥ कृष्णवर्णतनुः स्यामः करालः
स्योतिनिर्घृणः ॥ विकृष्टपर्वोरुरुक्षश्च विकृतेब्दे भवेनरः ॥२४॥ धूलीधूसरसर्वांगोदीर्घघर्घरसंभवा
न् ॥ कामातुरश्च संजातः खरसंवत्सरे नरः ॥२५॥ सदानंदः सदातुष्टः वापीकूपतडागकृत् ॥ अन्न
दातासुशीलश्च नरो नंदनवर्षजः ॥२६॥ शूरः संग्रामशीलश्च ख्यातः कीर्तियशोन्वितः ॥ पृथ्वीपति
र्जयी भूपो विजयेब्दे नरो भवेत् ॥२७॥ विद्वान्वादी लोकमानी सर्वशास्त्रविशारदः ॥ पूजामाप्नोति
सर्वत्र जयवर्षे प्रजायते ॥२८॥ उत्पन्नभोगभोक्ता च कामिनीवल्लभः सुखी ॥ सर्वाभरणभूषाढ्यो

Indira Gandhi National Centre for the Arts

य॰जा॰ मन्मथे च नरो भवेत् ॥२९॥ शठः क्रूरमतिर्दुष्टो हिंसको वृषलीपतिः ॥ वक्रो दुष्टवचः आवी दुर्मुखे ब्दे
४ भवेन्नरः ॥३०॥ धनधान्यं च भोगी च पशुवस्त्रसमृद्धिमान् ॥ कलावान् सगुणाढ्यश्च हेमलंबे समुद्भवः ॥३१॥
नंदी लुब्धो लसो दुःखी श्लेष्मणश्चातिरोगवान् ॥ निरतः पापकर्मेषु विलंबे वत्सरे शिशुः ॥३२॥
अविवेकी महाभागवीं निपातकुशलः खलः ॥ विकारीवत्सरे जातः प्राणी भवति चंचलः ॥३३॥ चंच
लो मदने सक्तः परसेवारतः सदा ॥ निद्राघूर्णितनेत्रश्च शार्वरीवर्षसंभवः ॥३४॥ चंचलश्चपलः
कामी परसेवारतः सदा ॥ हंता बहुजनानां च जातो वर्षप्लवाब्दके ॥३५॥ सुभगः शुभकर्मा च वि
द्याधर्मपरायणः ॥ दीर्घायुर्धनपुत्राढ्यः शुभकृद्वर्षजः पुमान् ॥३६॥ सर्वत्र विजयी चारुदृष्टिः प्रिय
गुणान्वितः ॥ दयालुः शुभकृद्वर्षे जातो भवति मानवः ॥३७॥ पिंगाक्षः पिंगकेशी च मंदगामी स्त्रिलो राम
लुपः ॥ परकर्मनिहंता च क्रोधी संवत्सरे नरः ॥३८॥ विश्वावसुसमुद्भूतः प्रजावान् ससमृद्धिमान् ४

॥शांतः सर्वगुणोपेतोदातामिष्टान्नभुक् शुचिः॥३९॥ परदाररतश्चौरः पारुष्यवचनः कृशः॥परा
भवसमुद्भूतो धनधान्यविवर्जितः॥४०॥प्लवंगवत्सरेजातः किलकष्टी च दुर्बलः॥पांडुरो दुष्टरोगश्च
स्वाचारो हितकृत्सुधी॥४१॥मध्यमरूपः प्रियवाक् सुधितो मर्पितो महान्॥किलकेजायते बालः स्थूल
हृत्कटिमस्तकः॥४२॥पंडितो धनभोगी च देवतातिथिपूजकः॥तामसः कृशदेहश्च नरः सौम्ये प्रजायते
॥४३॥नीचवृत्तिः शुचिः कामरहितः परदेशगः॥वेदनिंदापरः क्रोधी साधारणसमुद्भवः॥४४॥विरोधी
सर्वलोकानां पितृभक्तिविवर्जितः॥विरोधिकृद्वत्सरे च जातिसंकरकृद्भवेत्॥४५॥विद्वान् सर्वकलाभि
ज्ञो व्यापारकुशलः सुधीः॥राजमानी दानशीलः परिधावीसमुद्भवः॥४६॥प्रमाथीवत्सरेजातो नरो बंधुवि
रोधकृत्॥कुटुंबघातको लुब्धः पापकर्मरतः सधीः॥४७॥बहुभार्यो निचतुरः आनंदे वत्सरे भवेत्॥
पुत्रवान् धनवान्जातः पुत्रवृद्धिसमन्वितः॥४८॥सर्वभक्षी कृतांतश्च वर्णावर्णविवर्जितः॥हिंसा

Indira Gandhi National
Centre for the Arts

परससंतापी राक्षसेब्देनरो भवेत् ॥ ४९ ॥ वैश्यवृत्तिः स्वल्पधनः कुटुंबवत्सलः शुचिः ॥ जनसौख्यक
रो बालो जातो नलाख्यवत्सरे ॥ ५० ॥ कपिलः कृशिरोरोमी महोद्यमपरो भवेत् ॥ लोकांतकारकः का
लः पिंगलेब्देनरो भवेत् ॥ ५१ ॥ कालयुक्तसमुद्भूतो नरो भवति रोगभाक् ॥ ऋद्धिसिद्धियुतो नित्यं गीत
वाद्यविशारदः ॥ ५२ ॥ मैत्री कीर्तिपरो दाता धनधान्ययुतो भवेत् ॥ दीर्घायुर्बहुपुत्रश्च सिद्धार्थीवर्ष
जः पुमान् ॥ ५३ ॥ भयंकरवपुः पापी पिशुनो घातकृद्भवेत् ॥ रौद्रसंवत्सरे जातो नरः स्वल्पायुषो धनः ॥
५४ ॥ मूर्खः क्रूरमतिः कामी स्वकीयवचनः प्रियः ॥ अदाता धनलुब्धश्च दुर्मतीमभिवत्सरे ॥ ५५ ॥ नि
त्योत्साही क्षितिपतिर्गजाश्वरथसैनिकः ॥ वादित्रध्वनिसौख्याढ्यो दुंदुभीवर्षजो भवेत् ॥ ५६ ॥ शरीरे
च महारोगी शस्त्रपीडानिपीडितः ॥ दुःकर्मकृन्नखीजातो रुधिरोद्गारिवत्सरे ॥ ५७ ॥ नेत्ररोगी मंदहृच्छिद्रे
क्षो धर्मरतः सदा ॥ दुर्जनः कामबहुलो रक्ताक्षीवर्षजः शिशुः ॥ ५८ ॥ नामसो निर्घृणः क्रोधी धातुवादी भ

यंकरः॥ क्रोधनाब्देजातनरोवंचकः पापबुद्धिमान्॥५९॥ उत्पन्नार्थःक्षयकरः परसेवारतःखलः॥ क्षयसंव
त्सरेजातोनरोधर्मविवर्जितः॥६०॥ ॥इतिश्रीयवनजातकेसंवत्सरफलं॥ ॥अथायनफलं॥ ॥प्रियायुतः
सौख्यगुणान्वितश्चदीर्घायुराचारमतिप्रवीणः॥देवद्विजाचार्यपदानुरक्तःसौम्यायनेजातनरोभवेच्च॥
१॥ इतिउदगयनफलं॥ ॥अथदक्षिणायनफलं॥ ॥क्रूरःशठोरोगसुतप्तदेहःपापात्मकंचौररतःकृ
शश्च॥ पौश्वल्यरूक्तःक्रूरमतिःशिघ्रःस्याद्दाक्षिण्यजश्चैवनरोयदास्यात्॥२॥ इतिदक्षिणायनफलं
॥ ॥अथऋतुफलं॥ शिशिरेजायतेमर्त्योबलसौख्यचिरायुषः॥ मिष्टान्नभूचैवनरोदंतरोगीप्रजायते॥
१॥सुखीभोगीगुणीकांतःसदावसनवान्भवेत्॥ वसंतर्तौजातनरोदानकीर्त्तिपरोभवेत्॥२॥ वापीकूपतः
डारामदेवालयपरोभवेत्॥ वेदविद्वान्नदाताचग्रीष्मर्त्तौजायतेनरः॥३॥ देशग्रामप्रजाध्यक्षःकृषिकर्त्तोम
हद्युतिः॥ सस्यसंग्रहणेदक्षोवर्षर्तौजायतेनरः॥४॥ व्यापारकुशलोमंत्रीधर्मिष्ठःसत्यवाक्शुचिः॥ पंडि

य·जा· तोगुणवान्धीरः शरदृतुसमुद्भवः ॥५॥ श्लक्ष्णांगः पुत्रवान्वाग्मी धर्मिष्ठः सत्यवाक् शुचिः ॥ भुंजेतेमि
६ ष्टमन्नंचदेहेमंनेचभवेन्नरः ॥६॥ ॥ इतिऋतुफलं ॥ ॥ मेषलग्नोदयेजातोगुरुभक्तः प्रियंवदः ॥ गुणीकां
तः प्रियालुब्धः शूरः सर्वजनः प्रियः ॥१॥ वृषोदयेनरोजातोधनीकांतः प्रियंवदः ॥ लुब्धः कामीगुरुर्भक्तोमै
त्रीमानीमहाबलः ॥२॥ मिथुनोदयसंजातोज्ञानीयजनवत्सलः ॥ नानामतिसमायुक्तोदीर्घसूत्रीविम
र्षकः ॥३॥ कर्कलग्नोदयेजातोधर्मिष्ठोगुरुवत्सलः ॥ मिष्टान्नभुक् सुसंभोगीसौभाग्यस्वजनप्रियः ॥४॥ सिं
हलग्नोदयेजातोभोगीशत्रुविमर्षकः ॥ स्वल्पोदयोल्पपुत्रश्चसोत्साहीरणविक्रमः ॥५॥ कन्यालग्नोद
येजातोनानाशास्त्रविशारदः ॥ सौभाग्यधनसंपन्नः सत्यवादीनृपप्रियः ॥६॥ तूलालग्नोदयेजातः शु
ध्दोधीधर्मनायकः ॥ प्रज्ञावान्युक्तधर्मस्तधनाढ्योधनवर्जितः ॥७॥ अलिलग्नोदयेजातशौर्यवान्मृदु राम·
मानसः ॥ विज्ञानज्ञानवेत्ताचविद्वेषीविग्रही सुधीः ॥८॥ धनलग्नोदयेजातोनीतिवान्धनवान्सुधीः ६

Indira Gandhi National Centre for the Arts

कुलमध्येप्रधानोहिप्राज्ञोभृत्येषुपोषकः॥९॥ मृगलग्नोदयेजातोनीचकर्माबहुप्रजाः॥ लुब्धोलसोश
ठोदीनःस्वकार्यसुकृताधमः॥१०॥ कुंभलग्नोदयेजातोवित्तवानतिसौहृदः॥परदाररतोनित्यंमृ
दुकार्येमहान् सुधीः॥११॥ मीनलग्नोदयेजातोप्रभुवाक्येषुबुद्धिमान्॥अल्पकामोतिगौरश्चप्र
जावांश्चैवधार्मिकः॥१२॥ ॥इतियवनजातकेमेषादिलग्नफलं॥ ॥अथग्रहभावफलानि॥ ॥
लग्नस्थितोदिनकरःकुरुतेंगपीडांपृथ्वीसुतोवितनुतेरुधिरप्रकोपं॥छायासुतःप्रकुरुतेवहुदुः
खभाजंजीवेंदुभार्गवबुधाःसुखकांतिदाःस्युः॥१॥दुःखावहाधनविनाशकराःप्रदिष्टा वित्तस्थि
तारविशनैश्चरभूमिपुत्राः॥ चंद्रोबुधःसुरगुरुर्भृगुनंदनोवासर्वेधनस्यनिचयंकुरुतेधनस्थाः॥२
॥ भानुःकरोतिनिरुजंरजनीकरोवाकार्यान्वितंक्षितिसुतःप्रचुरःप्रभावं॥सिद्धिंबुधःसुधिषणः
सुविनीतदोषःस्त्रीणांप्रियंरविसुतोभृगुज स्तृतीयः॥३॥ आदित्यभौमशनयःस्फुरववर्जि

प·जा· नांगं कुर्वंति जन्मनि रतं स कविरं चतुर्थः ॥ चंद्रो बुधः सुरगुरुर्भृगुनंदनो वा सौख्यं धियं नृपतिनास
७ नतं प्रवृत्तिः ॥ ४ ॥ पुत्रे रविप्रचुरकोपमतिं बुधोपि निःसंनतिं शनिधरातनुजोह्नपुत्रं ॥ शुक्रेंदुदेव
गुरवः सुतधाम संस्थाः कुर्वंति पुत्रनिवहं सुखिनं सुरूपं ॥ ५ ॥ मार्तंड भूमितनुजौ हतशत्रुपक्षं
गुंवरं रिपुगृहे नृपपूजनीयं ॥ शुक्रेंदुजो मतिविहीनमतः सुरोगं जीवः करोति विकलं पुरुषं शशांकः
॥ ६ ॥ तिग्मांशुभौमशनयः किल सप्तमस्थाः कुर्वंति दुःखनिवहं तनुसंततिं च ॥ जीवेंदुशुक्रवि
बुधं बहुपुत्रयुक्तं धर्मान्वितं जनमनोहररूपवेद्यं ॥ ७ ॥ सर्वे ग्रहा दिनकरप्रभिमुखानि तां तं मृत्युस्थि
ता विदधतो किल दुष्टबुद्धिं ॥ शस्त्रोपघातपरिपीडितदृष्टमात्रं विद्याविहीनमतिरोगगुणैरुपेतं ॥ ८ ॥ ध
र्मस्थिता रविशनैश्चरभूमिपुत्राः कुर्वंति धर्मविलयं जनयंति शून्यं ॥ चंद्रो बुधो भृगुसुतश्च सुरेंद्रमं राम
त्री धर्मक्रियासमधिकं कुरुते मनुष्यं ॥ ९ ॥ आदित्यभौमशनयः किल कर्मसंस्थाः कुब्जं नरं बहु ७

लकर्मकरंदरिद्रं॥चंद्रःसुकीर्तिमुशनाबहुवित्तयुक्तंरूपान्वितंबुधगुरुःशुभकर्मलश्च॥१०॥ला
भस्थितोदिनपतीनृपरूपरूपंनाशपतिर्बहुधनंक्षितिजःक्षितीशं॥सौम्योविवेकवसतिंसुभगं
चजीवःशुक्रःकरोतिसधनंरविजःसुकीर्तिं॥११॥सूर्यःकरोतिपुरुषंव्ययगोविशीलंकाणंशशी
क्षितिसुतोबहुपापभाजं॥चंद्रात्मजोगतधनंसगुरुःकृशांगंशुक्रोबहुव्ययकरंरविजःसुनी
त्रं॥१२॥ ॥इतिग्रहभावफलानि॥ ॥अथमासफलानि॥ ॥ब्रह्मचर्यरतोनित्यंवेदाध्ययनत
त्परः॥गुरुदेवद्विजातीनांभक्तश्चैत्रसमुद्भवः॥१॥सर्वलक्षणसंयुक्तोदीर्घदर्शीकलानिधिः॥
सात्विकश्चिरजीवीचवैशाखेजायतेनरः॥२॥निपुणःसर्वकार्येषुनिर्मांसश्चपरीक्षकः॥क्रयविक्र
यकृन्नित्यंभवेज्ज्येष्ठेचमानवः॥३॥निर्धनोबहुभुक्कष्टिहलकर्मरतःसदा॥व्याधितोमूर्खबुद्धिश्च
भवेदाषाढजोनरः॥४॥श्रावणेजायतेमर्त्योवेदकर्मविशारदः॥पुत्रदारधनैर्युक्तोसर्वलोकेप्रपूजितः

य॰जा॰ ॥५॥भोगीदाताकृशोदीर्घोगौरकामीबहुस्त्रिपः॥पुत्रवान्धनवान्श्रीमान्नरोभाद्रपदेभवेत्॥६॥
८ ॥आश्विनेचनरोजातोविद्वान्भूपप्रियोभवेत्॥बहुभृत्यस्त्रियायुक्तोबहुपत्योल्पजीवितः॥७॥वा
चालोवक्रबुद्धिश्चकुंचिताग्रकचोलसः॥कार्तिकेजायतेनित्यंब्रह्मचर्यरतोभवेत्॥८॥तीर्थयात्रार
तोनित्यंमंत्रदीक्षापरायणः॥मार्गमासेभवेन्मर्त्यःसदाशास्त्रविशारदः॥९॥पौषमासेसमुत्पन्नोनरो
दुःखपरोभवेत्॥सर्वस्वरहितोगुप्तःपापमार्गरतःखलः॥१०॥योगीश्वरस्तपोनिष्ठोवेदवेदांग
पारगः॥शांतोदयान्वितोदक्षोनरोमाघेप्रजायते॥११॥सुकुमारःसदाभोगीकामिनीवल्लभःसुखी
॥फाल्गुनेजायतेमर्त्योगजाश्वनरभूषितः॥१२॥ ॥इतियवनजातकेमासफलं॥ ॥अथदिनरा
त्रिफलं॥तेजस्वीपितृसादृश्यश्चारुदृष्टिर्नृपप्रियः॥बंधुप्रियोधनाढ्यश्चदिवाजातोनरोभवेत्॥१ राम॰
॥मंददृक्बहुकामार्तःक्षयरोगीमलीनसः॥क्रूरात्माछिन्नपापश्चनिशिजातोनरोभवेत्॥इतिदिवारा ८

त्रिफलं॥ ॥अथपक्षफलं॥शुक्लपक्षेनरोजातोदीर्घायुःपुत्रवान्भवेत्॥बहूनांपालकोदातासुहृन्मा
नीस्त्रियाजितः॥१॥अलसोमलिनोद्वेषीनिंदकोग्रामभाषकः॥कृष्णपक्षेभवेन्मर्त्यःसर्वधर्मबहिष्कृतः
इतिपक्षफलं॥अथतिथिफलं॥प्रतिपद्दिवसेजातोभाग्यवान्गुणवान्भवेत्॥स्त्रीसौख्यंवेश्मसौख्यं
चवर्षाशीतिमहायुषः॥१॥द्वितीयादिवसेजातोनरःसत्यपरोभवेत्॥जनानंदपरःशूरःशास्त्रकर्मरतोभवे
त्॥२॥तृतीयायांनरोजातःस्त्रीलोभःकृपणश्चलः॥व्रतोपवासनिरतोसत्यवादीबलान्वितः॥३॥चतुर्थ्यां
तुनरोजातोलुब्धःपिशुनवान्भवेत्॥चंडःसाहसिकःशूरःबलुवित्तषठान्वितः॥४॥पंचम्यांतुनरोजातो
दीर्घायुःपुत्रवान्भवेत्॥महामतिःस्थिरःशूरःसत्यवादीजितेंद्रियः॥५॥षष्ठ्यांचैवनरोजातोव्रणांकि
ततनुस्थिरः॥स्त्रीलोलुपोतिसुहृदोविद्याकीर्तियुतोभवेत्॥६॥सप्तम्यांतुनरोजातोधनवान्गुणवान्
भवेत्॥गुरुदेवार्चनपरःसदाचारोदृढव्रतः॥७॥अष्टमीदिवसेजातोसदारनिरतोभवेत्॥बहुवादीचच

य॰जा॰ पलश्चलचित्तोतिनिष्ठुरः॥८॥ कामयुक्तोमहाशूरो गीतनृत्यरतः सदा॥ शत्रुघ्नश्चमहाक्रोधीनव
९ म्यांजायतेनरः॥९॥ दशम्यांजायतेमर्त्योलोकोव्यापारकोविदः॥ कलाशास्त्रेषुकुशलः सत्यवादी
दृढव्रतः॥१०॥ एकादश्यांनरोजातोदुराचारोतिदुःसहः॥ सुभगोरतिलोलश्चवस्त्रभोजनतत्परः॥
११॥ द्वादश्यांतुनरोजातोस्त्रीजितोधनवान्भवेत्॥ व्रतोपवासनियतः सशत्रुमतिमान्भवेत्॥१२॥
त्रयोदश्यांनरोजातोसुशुद्धः सर्वकर्मसु॥ बुद्धिमान्व्याधिनिर्मुक्तः सदाबंधुयुतोभवेत्॥१३॥ चतु
र्दश्यांनरोजातोपूर्णांगः सुस्थिरोभवेत्॥ सदाहृष्टोमनःकामीसुभगोतिरणान्वितः॥१४॥ अमायां
तुनरोजातोशत्रोरार्त्तिगतःसुखी॥ सुभगोबलहीनश्चवित्तेबहुसमाकुलः॥ ॥इतितिथिफलं॥ ॥
अथवारफलं॥ ॥अथातःसंप्रवक्ष्यामिवासराणांचजातकं॥ शृणुयत्नेनहेवत्सनराणांचविशेषतः राम
॥१॥ अल्पकुंचितमूर्धाचमुखेपित्राकृतिस्तथा॥ क्षात्रवृत्तिंसुरूपश्चमधुपिंगलकांतिमान्॥ ९

स्थूलहनुः कोपी वक्ता चर्यसहप्रभुः॥ सुरगुर्वर्चनरतस्तेजस्वी पितृधिष्ण्यजः॥१०॥ गुनिमांश्च धनीदा
ता नृत्यशास्त्रविशारदः॥ कार्याकार्यविचारज्ञो भाग्यनक्षत्रजो नरः॥११॥ जितशत्रुः सुखी भोगी नित्य
शःश्रमदाप्रियः॥ कलाभिज्ञः सत्यरतः स्फ विद्वानर्यमर्क्षजः॥१२॥ कृतविद्यश्च सुभगो धनाढ्यः साहसी भवे
त्॥ परोपकारी सर्वज्ञो हस्ते जातो नरो भवेत्॥१३॥ चित्रमाल्यांबरधरः कामशास्त्रविशारदः॥ गुनिमा
न्धनवान्भोगी पंडितस्त्वाष्ट्रधिष्ण्यजः॥१४॥ धार्मिकः सत्यवाक्क्रूरः क्रयविक्रयनैपुणः॥ कामी बहुक्र
तुर्दानो विद्यावान्मरुनर्क्षजः॥१५॥ अभ्यसूयापरः स्त स्यात्कृपालुरति — निंदितः॥ जितेंद्रियोऽर्थवान्
लुब्धो विशाखाधिष्ण्यसंभवः॥१६॥ नृपकार्यरतः शूरो विदेशस्थोंगनाप्रियः॥ सुरूपश्छिन्नपापश्च भ
वेन्मैत्राख्यधिष्ण्यजः॥१७॥ बहुव्ययकरः क्लेशसहकामी दुरासदः॥ क्रूरचेष्टो मृषाभीतो धनवा निं
द्रधिष्ण्यजः॥१८॥ साधुमानी धनी भोगी परकार्योपकारकः॥ मिथ्योपचारः स्त्री लोकः श्लक्ष्ण्यो निर्ऋ

य॰जा॰ निधिष्ण्यजः॥१९॥सुसुखीसुविनीतश्चत्यागीस्याज्ज्ञोपुवत्सलः॥क्लेशभोगीयुवामानीजलनक्षत्रसंभ
११ वः॥२०॥कृतज्ञोधार्मिकःशूरोबहुपुत्रविनीतवान्॥सुकलत्रःसुरूपश्चवैश्वनक्षत्रसंभवः॥२१॥उ
दारःसुतवान्धीरःविद्वान्वक्ताधनान्वितः॥कलावान्सकलाभिज्ञोधार्मिकःश्रवणर्क्षजः॥२२॥धर्वि
ष्ठोव्यसनीक्रूरोक्षयरोगयुतःशठः॥परदाररतःशूरोधनिष्ठासंभवोनरः॥२३॥शततारजनिर्यस्यकुशी
लेदारलंपटः॥मायाचापिविशालश्चसौख्यभु कूषठउच्यते॥२४॥उद्विग्नस्त्रीजितःशाक्यपरनिंदासु
नैपुणः॥अधर्मतत्परःशूरश्चाजपादेचसंभवः॥२५॥प्रजावान्धार्मिकोवक्ताजितशत्रुःसुखप्रदः॥
दृढव्रतोसदाकामीचाहिर्बुध्न्यसमुद्भवः॥२६॥रूपवान्धनवान्भोगीपंडितश्चजलार्थभाक्॥कामी
दुर्गजितःशूरःपौष्णजःपरदेशगः॥२७॥इतिनारदीयसंहितायांनक्षत्रफलं॥ ॥अथयोनिफलं॥॥ राम
अश्विनीशततारकाअश्वयोनिः॥फलं॥चंचलश्चपलोहृष्टःशीघ्रगामीरणप्रियः॥अश्वयोनौतुसं ११

Indira Gandhi National Centre for the Arts

॥ ॥ स्थिरःप्रचंडोरस्कश्चरक्तःश्यामतनुःशुचिः॥ पित्ताधिकोतिचतुरोजनयेद्रविवासरे॥२॥
॥इतिसूर्यफलं॥ सौम्योतिकांतोमधुरोपिशंगोतिकृशस्तनुः॥ युवाचसूक्ष्मकेशाश्चप्रवासाकुंचि
तोगुणी॥१॥ सोमवारेनरोजातःसात्विकःस्यान्नवृत्तिमान्॥ ह्रस्वकायोतिगौरश्चपृथुवक्षाःसुबुद्धिमा
न्॥ इतिसोमवारफलं॥ क्षात्रवृत्तिसमायुक्तोजनयेद्भौमवासरे॥ रक्तायरक्तलोचनोवाग्मतोमररक्षकः
॥इतिभौमः॥ श्यामवर्णोमहागौरकांतिमान्स्फुटवाक्सुधीः॥ निपुणोवर्तुलःशीरःपादश्चैवत-
थाकटिः॥ रूपवान्मतिचाकल्पोजनयेद्बुधवासरे॥१॥ इतिबुधः॥ सुधीरोबहुलोकेशःकालशा
स्त्रविशारदः॥ प्रगल्भंकुशलोधीरःसभवेन्गुरुवासरे॥१॥ इनिगुरुः॥ प्रछिन्नकार्यसुमत्तिर्जातः
शुक्रस्यवासरे॥ सुधीसदेशकालज्ञःकलाशास्त्रविशारदः॥१॥ इतिशुक्रस्य॥ दीनःकृशांगपरम्मदीर्घा
लस्योदुरासदः॥ वाताधिकोनीचकर्मामूर्खस्थूलनखत्वचः॥१॥ रुक्षोदुर्बलदेहश्चमलिनोतिचलः

य॰जा॰ खलु॥ रौद्रः क्रोधी राक्षसश्च जनितः शनिवासरे॥२॥ इति शनिवारफलं॥ अथ नक्षत्रफलं॥ अर्थवां–
१० श्चापि शूरश्च सुभगो धनवल्लभः॥ दक्षः क्रूरो महाकायश्चाश्विन्यां जायते नरः॥१॥ भरण्यां च प्रवक्ता च
हारोगी सुस्थिरो भवेत्॥ सप्राज्ञो मतिमांश्चैव सत्यवाक्यो दृढव्रतः॥२॥ तेजस्वी नीतिमांश्चैव बहुभु
क् जनवल्लभः॥ गंभीरः कुशलो मानी वन्हिनक्षत्रजः शुचिः॥३॥ सुरूपस्थिरधीर्मानी भोगभाक् सुरतप्रियः
॥ प्रियवाक् चतुरो दक्षस्तेजस्वी धातृधिष्ण्यजः॥४॥ उत्साही चपलो भीरुर्धनी मानी प्रियः शुचिः॥ आग
मज्ञः प्रभुर्दक्षश्चंद्रनक्षत्रजो नरः॥५॥ अविचारपरः शूरो निपुणः क्रयविक्रये॥ गविहिंस्रः क्रूरतनुः
कृतघ्नः शिवधिष्ण्यजः॥६॥ दुर्मेधवान् दर्शनीयः परस्त्रीकार्यनैपुणः॥ सहिष्णुरल्पसंतुष्टोशीघ्रगो
दितिधिष्ण्यजः॥७॥ अतिकामी सुपुष्टश्च चंचलः स्थिरधीः शुचिः॥ पुष्यनक्षत्रसंजातः सर्वशास्त्रवि राम
शारदः॥८॥ सुरूपः सुभगः क्रूरः परस्त्रीनिरतः शठः॥ अवक्ताव्यसनाक्रांत सार्पनक्षत्रजो नरः॥९॥ क्रूरः १०

Centre for the Arts

जातोबलवान्स्वामिवल्लभः ॥१॥ भरणीरेवती गजयोनिः ॥ फलं ॥ मंदगामीबलाढ्यश्चबहुरुश्रीरा-
जवल्लभः ॥ सत्यवान्ज्ञानवांश्चैवगजयोनौभवेन्नरः ॥२॥ कृ३ पु८ अजायोनिः ॥ फलं ॥ दुर्जनंदुर्घटस्था
नंभेदवाननिशंवितः ॥ अजायोनिप्रजातोसौबहुवृद्धिकरोभवेत् ॥३॥ रो४ मृ५ सर्पयोनिः ॥ फलं ॥ दर्श
नाड्डिनिर्दनित्यंस्वटाटोपोनवर्तते ॥ परवेश्मापहारीचसर्पयोनौप्रजायते ॥४॥ आ६ मू१९ अश्वयो-
निः ॥ फलं ॥ सर्वभक्षीवृथावादीधूर्तःस्वामिहितेरतः ॥ अरण्यांगंदुःखमहोश्वानयोनौभवेन्नरः ॥५॥
पु७ आ९ मार्जारयोनिः ॥ फलं ॥ पिंगाक्षःसर्वभक्षीचचंचलोद्वेषकारकः ॥ मार्जारयोनिसंजातोवृथाकोपी
भयान्वितः ॥६॥ म१० पू११ मूषकयोनिः ॥ फलं ॥ धूर्तस्वकार्यनिरतःपरकार्यविनाशकः ॥ शत्रूणांमूल
वच्छेत्तानरोमूषकयोनिजः ॥७॥ उ१२ उ२६ पशुयोनिः ॥ फलं ॥ गोधनैर्बहुभिर्युक्तःस्त्रीरागारोतिसुंदरः
॥ परकार्यप्रकर्त्ताचपशुयोनिनरोभवेत् ॥८॥ ह१३ स्वा१५ महिषीयोनिः ॥ फलं ॥ मंदगामीस्थूल

य॰ जा॰ १२ नतुर्बव्हाशी बलवान्भवेत्॥ बहुस्त्रीराज्यभोगीच महिषीयोनिसंभवः॥९॥ चि१५ वि१६ व्याघ्र
योनिः॥ फलं॥ कृतांतः सर्वभक्षीच विद्यावान् कुशलोभवेत्॥ व्याघ्रयोनौ नरोजो नो दर्शनाद्भयसोम
हान्॥१०॥ अ१७ ज्ये१८ मृगयोनिः॥ फलं॥ गीनवाद्यप्रियोनित्यं सुंदरश्चारुदर्शनः॥ मृगयाभिरतो
धूर्त्तोमृगयोनौ नरोभवेत्॥११॥ पू२० श्र२२ कपियोनिः॥ फलं॥ पिंगाक्षश्चपलोरण्यगामीचापत्य
वान्भवेत्॥ नविसेनस्ककश्चित् कपियोनिसमुद्भवः॥१२॥ पू२० अभिजित् नकुलयोनिः॥ फलं॥
चारुदर्शनकार्यार्थीपरकार्यार्थसादरः॥ गृहवासीचिरायुस्यान्नरो नकुलयोनिजः॥१३॥ ध२३
पू२५ सिंहयोनिः॥ फलं॥ महाबलीच पिंगाक्षः कृशोमध्ये भयानकः॥ सिंहयोनौ प्रजातस्तु सर्वभ॰
क्षीसमुद्भवः॥१४॥ ॥इतियवनजातके योनिफलं॥ ॥ अथगणफलं॥ ॥गुरुदेवद्विजातीनां भक्तः राम
शास्त्रविमर्षकः॥ देवनासदृशीमूर्तिर्जातोदेवगणोभवेत्॥१॥ नामसः पापकृद्द्वेषीधर्मिष्ठः कल १२

ह्रप्रियः॥ निष्ठुरश्छिन्नपापश्च गणेस्याद्राक्षसेनरः॥२॥ अन्नदाताधनाढ्यश्च प्रजावान्देवपूजकः
॥ मानुषर्क्षेनरोजातोवस्त्रस्त्रीसुखभोगकः॥३॥ ॥इतिगणफलं॥ ॥अथयवनजातकेयो
गफलं॥ ॥स्वदारापरितुष्टश्चगृहकार्येषुनिष्ठितः॥स्वतंत्रःसर्वकार्येषुविष्कंभेजनयेशुचिः॥१॥
सुरूपश्चप्रियवचोधनधान्यसमन्वितः॥प्रगल्भोमनसातुष्टोप्रीतियोगेचजायते॥२॥प्रीतिस्तस्य
शुचिस्तस्यजलक्रीडापरायणः॥ आयुरारोग्यवांश्चैव आयुष्मद्योगसंभवः॥३॥ बहुवाक्यबहुन
रोनिर्गुणःसर्वकर्मसु॥गंधप्रियश्चसुभगोसौभाग्येजायतेनरः॥४॥ लक्ष्मीवान्गुणवांश्चैवशौच
युक्तःसदाशुचिः॥ शोभनेचनरोजातोधूर्त्तश्चकीर्तिवत्सलः॥५॥ परापवादनिपुणःसत्यहीनःसदा
लसः॥परदाररतःकामीअतिगंडेभवेद्यदि॥६॥प्रजावान्गुणवांश्चैवब्रह्मकर्मरतःशुचिः॥न्याय
कर्मरतोनित्यंसुकर्मणिभवेद्यदि॥७॥धार्मिकःसत्यवादीचदृढचित्तःसुलोचनः॥ क्रूरःपटुमतिश्चैव

य॰जा धृतियोगेप्रजायते॥८॥ असत्यवादीपिशुनश्चलचित्तोतिनिष्ठुरः॥शूलयोगेनरोजातोशूलवांज्ञाय
१३ तेध्रुवं॥९॥वाचालःसत्यहीनश्चक्लेशभाक्कलहप्रियः॥सुस्थिरःसुभगोगंडनरोजातोसमाहितः॥
१०॥महामतिस्थिरश्चंडसत्यवादीजितेंद्रियः॥वृद्धियोगेनरोजातोधनवान्ज्ञानवान्भवेत्॥११॥ध्रु
वकार्येसदाकर्ताशत्रुपीडाविवर्जितः॥ध्रुवयोगेनरोजातोध्रुवकार्येमहामतिः॥१२॥धूर्तोमलिनचि
त्तश्चपरकार्यविनाशकः॥निष्ठुरोमद्य भोगीचव्याघातेजायतेयदि॥१३॥भोक्तागोधनवांश्चैवसर्वदा
श्चगुणान्वितः॥तेजस्वीपितृसादृश्योहर्षयोगेप्रजायते॥१४॥सुस्थिरःसत्यसंपन्नोबुद्धिमांश्चगुणा
न्वितः॥तेजस्वीपितृसादृश्योवज्रयोगेप्रजायते॥१५॥कुलिनःसत्यसंपन्नोदृढवाक्योमहामतिः
॥संसिद्धःसर्वकर्ताचसिद्धियोगेप्रजायते॥१६॥स्थिरःकार्यकरोनित्यंपरकार्यविनाशकः॥असत्य राम
वादीमूर्खश्चजननंव्यतिपातके॥१७॥कुलेश्रेष्ठःसत्यवादीभोगीमित्रजनप्रियः॥धनधान्यसमृ १३

श्च वर्याण्योगे प्रजायते ॥१८॥ पापवृत्तिदुराचारो प्रबुद्धः साहसी खलः ॥ मलिनो मंददेहश्च परि
घे जननं पदि ॥१९॥ प्रसन्नवदनो धीरः सर्वव्यापारकोविदः ॥ धनाढ्यो नीतिमांश्चैव शिवयोगे प्रजायते ॥२०
॥ सिद्धः सर्वेषु कार्येषु परकार्यप्रकारकः ॥ गुरुदेवद्विजानां च सिद्धियोगे प्रजायते ॥२१॥ विविधव्ययवान्
शीलः स्वामिभक्तो महामतिः ॥ गंधप्रियः सदोदारः साध्ययोगे प्रजायते ॥२२॥ सुभगो धार्मिको लोके शू
रः सत्यसमन्वितः ॥ प्रणतः प्रियकारी च शुभयोगे प्रजायते ॥२३॥ सत्यवान् सुमतिः कांतो धनी नां सु
मतो नरः ॥ सर्वकार्येषु कुशलो शुक्लयोगे प्रजायते ॥२४॥ प्रियवाक् दानदः सत्यब्रह्मज्ञो ब्राह्मणप्रियः ॥ प्र
गल्भो निर्मलो धीरः ब्रह्मयोगे प्रजायते ॥२५॥ धनवांश्च महाभोगी राजकर्मगुणान्वितः ॥ योगी सर्वगुरु
का कीर्ऐंद्रयोगे प्रजायते ॥२६॥ मलिनः पिशुनश्चैव बहुभाषणतत्परः ॥ परदाररतो नित्यं जायते यो
गवैधृतौ ॥२७॥ ॥ इति श्रीयवनजातके सिद्धांतरे योगफलानि ॥ ॥ अथ करणफलं ॥ ॥ मंदशीघ्र

Centre for the Arts

उदारश्चसुखवान्धनवर्जितः॥ बवाख्येकरणेजातो भवेत्सेनापतिर्नरः॥ १॥ सुधीरःसुभगस्त्यागी बा
ललीलारतःसुखी॥ बालवेयदिजातस्तु बालकर्मरतः सदा॥ २॥ प्राछन्नकौटल्येयस्तु कौतुकानंदवर्ध
नः॥ पापकर्मरतःसौख्यात्कौलवेजननंयदि॥ ३॥ सात्विकःसत्यसंपन्नोस्थिरश्चंडःप्रतापवान्
॥ तामसोमलिनःसुष्टोजातस्तैतिलकेसदा॥ ४॥ मंत्रवान्मतिमांदक्षोदुर्बलोवहुभाषणः॥ चपलःक
लहरतोगराख्येजायतेनरः॥ ५॥ नानापण्यवशारज्ञोवणिक्कर्माभिजीवकं॥ वणिजाख्येनरोजातोवणि
क्कर्मरतोभवेत्॥ ६॥ क्रूरःसाहसिकश्चंडःपापकर्मरतःखलः॥ प्रभूतःसर्वकार्येषुविष्ट्याख्येचप्रजायते॥
७॥ सदोद्योगकरःशांतोसदादानीमहामतिः॥ शकुनाख्येजातनरःशकुनज्ञोविशेषतः॥ ८॥ कृषिवाणि
ज्यकाराचसदोद्योगीकृतक्रमः॥ निरालसःसत्ययुक्तोजातश्चैवचतुष्पदे॥ ९॥ नानाधातुविशेषज्ञःस्वक
र्मगुणवान्भवेत्॥ नागाख्यकरणेजातोनागानांपठनेरतः॥ १०॥ किंस्तुघ्नकरणेजातोपापकर्मामथामतिः
क्रूरःषंढोदरिद्रीस्यान्नामभावेनतत्फलं॥ ११॥ इतिश्रीयवनजातकेसिद्धांतरेकरणफलं॥ अथराशिफ

लं॥ अथयवनजातकेनत्रादौमेषराशिगुणः॥ पुत्रवान्भाग्यवानुग्रः परोपकारणेरतः॥ राजकृज्ज्योधर्म
रतःसुभोगीशीलवान्भवेत्॥१॥ द्विभार्यश्चपलस्तेयीभीरुवर्षज्वरीभवेत्॥ प्रथमे१ सप्तमे७ वर्षेवत्स
रेचत्रयोदशे॥२॥ तृतीये३ वत्सरेतोयपूर्णभांडेनिमज्जति॥ द्वादशा१२ब्देतथानद्यां षोडशाब्देल्पमृत्यु
कृता॥३॥ पंचविंशति२५ वर्षेचस्वल्पायुकतिवांधवाः॥ विषूचिकाभयंसप्तदशे१७ द्वात्रिंश ३२वत्सरे॥
४॥ शस्त्रघातेननीव्रेणस्वल्पमृत्युर्भविष्यति॥ शुभग्रहावलोकेनजीवेन्नवति९० वत्सरे॥५॥ कार्तिकेब
हुलेपक्षेनवम्यांबहुरात्रके॥ बुधेन्हिशीर्षमूलेलंनिधनंचभविष्यति॥६॥ इतिमेषराशिगुणः॥ अथवृषभ
राशिगुणः॥ कृपणश्चार्थवांश्चैवआपजीस्त्रियाजिताः॥ अदातापरकामीचस्थिरःसत्यरतःप्रियः॥१॥ द्विबु
कस्तनमध्येचकिंचिद्दिघ्नंप्रदृश्यते॥ वर्षे१ ज्वरीवर्ष३ सव्यचरणेअग्निभयं॥ वर्षे९ ज्वरीवर्षे२५ उदकभयं
। वर्षे१९ अल्पमृत्युः॥ वर्षे१९ द्विभार्यः वर्षे९६ आयुः॥ माघमासेशुकुपक्षेनवम्यांभृगुवासरे॥ नक्षत्रेरोहि
णीसंज्ञेनिधानंतस्यनिर्दिशेत्॥ इतिवृषभराशिगुणः॥ अथमिथुनराशिगुणः॥ कुटुंबवत्सलश्चैवस्त्री

रा॰जा॰ णांकौतूहलप्रियः॥ वयस्याद्येसुखीमध्येवयस्यंतुचमध्यमे॥१॥ द्विभार्योगुरुदेवानांपूजकोगुणवान्सु
१५ खी॥ वर्षे५वृषभयंवर्षे१६उदकभयं॥ वर्षे१८वर्णरोगः॥ वर्षे२१अल्पमृत्युः॥ वर्षे७७आयुः॥ वैशाखेशुक्ल
पक्षेचद्वादश्यांबुधवासरे॥ मध्यान्हेहस्तनक्षत्रेमृत्युस्तस्यविनिर्दिशेत्॥ इतिमिथुनः॥ अथकर्कराशिगु
णः॥ संग्रहीसर्ववस्तूनांपुत्रवान्शीलवान्गुणी॥ कार्यकर्तापितुर्मातुर्भक्तःस्त्रीजितमृत्युवान्॥१॥ वर्षे३
ज्वरी॥ वामभागेग्निभयं॥ वर्षे३शिश्नेतिलकः॥ वर्षे१९सर्पभीः॥ पंचबांधवाः॥ वर्षे३२अल्पमृत्युः॥ वर्षे९६आ
युः॥ माघेसितेनवम्यांतुरोहिण्यांनिधनंभृगौ॥ इतिकर्कराशिगुणः॥ अथसिंहराशिगुणः॥ धनधान्ययु
तःश्रीमान्विक्रमीतेजसायुतः॥ माघमासप्रियोमिष्टान्नभोजीचकलानिधिः॥१॥ वर्षे१बाधा॥ वर्षे१दक्षि
णहस्तपादेअग्निभयं॥ वर्षे१३विषूचिकाभयं॥ वर्षे५गोभयं॥ वर्षे७ज्वरः॥ वर्षे३२अल्पमृत्युः॥ इतिसिंह
राशिगुणः॥ अथकन्याराशिगुणः॥ अर्थवान्स्वजनानांचप्रियस्याद्बहुविक्रमः॥ वर्षे५वामनेत्रेरोगः॥ राम
वर्षेत्रीणिअग्निभयं॥ वर्षे९ज्वरः॥ वर्षे२१प्रपतनं॥ बहुस्त्रियः॥ स्त्रीबंधः॥ शिश्ने२१लांछनःवर्षे१३महापीडा १५

Centre for the Arts

विषूचीसंभवः कंठलांछनंच वर्षे १५ सर्पभयं वर्षे ३० अरण्ये शस्त्रघातः ॥ नित्यंप्रवासी वर्षे ८० आयुः कृष्णात्रयो
दशीचैत्रेरविवारेमृतिर्भवेत् ॥ इतिकन्याराशिगुणाः ॥ अथतूलाराशिगुणः ॥ विद्वद्वादीलोकपूज्योवस्तु
ग्राहीसलक्ष्मिवान् ॥ वापीकूपतडागादिदेवतागारकारकः ॥ द्विभार्यः ॥ वर्षे ७ अग्निभयं ॥ वर्षे ८ ज्वरः ॥ वर्षे
१२ उदकभयं ॥ वर्षे २१ अल्पमृत्युः ॥ वर्षे २० वृक्षपातः तुरंगतोवा स्वल्पबंधुः वर्षे ८५ आयुः वैशाख
स्यसितेपक्षेसर्प र्क्षेभूसुतेमृतिः ॥ इतितुलराशिगुणः ॥ ॥ अथवृश्चिकराशिः ॥ ॥ ससंतुष्टःसदा
क्रोधीद्वेषीचकलहप्रियः ॥ परतापकरोमित्रद्वेषीविश्वासघातकः ॥ वर्षे १५ ज्वरः वर्षे ३ अग्नि
भयं ॥ वर्षे २५ अल्पमृत्युः ॥ चतुर्बंधुसुतः ॥ वर्षे ६० काशींगमिष्यति ॥ द्विभार्यः ॥ बहून्यपत्यानि
॥ वर्षे ९० आयुः ॥ ज्येष्ठशुक्लदशम्यांच बुधेहस्तेमृतिर्भवेत् ॥ ॥ अथधनराशिगुणः ॥ ॥ लोकप्रि
योराजमान्यः सर्ववस्तुषुसंग्रही ॥ क्षत्रजित् पंडितोमानी द्विभार्यः पुत्रवत्सलः ॥ १ ॥ वर्षे १ महा
रोगी ॥ वर्षे १३ अपमृत्युः परस्त्रीलंपटः ॥ प्रथमेवयसेश्रीमान् बंधुभिःसहितोनरः ॥ ४ ॥ वर्षे ७५ आ

 प्तुः शता १०० सुर्वी॥ शतायुः स्फ़भ दृष्ट्यास्यादाषाढे कृष्णसंभवे॥ पंचम्यां श्रवणयुते वत्सरे मरणं॰
 शनौ॥ ॥इतिधनराशिः॥ ॥अथमकरराशिगुणः॥ ॥विचक्षणः कर्मकर्ता बहुपुत्रसमन्वितः॥
अनृतीसप्तमेवर्षेवारिभीस्यान्नसंशयः॥१॥ वर्षे१० वृषपातः॥ वर्षे२१ ज्वरः वर्षे ३३ अपमृत्युः वर्षे ५ पी
डा वर्षे २५॥ ३० वामांगे अग्निभयं॥ शुभदृष्ट्या शतायुष्या दशम्यां श्रवणे सिते॥ भौमे न्हि मरणं ज्ये
ष्ठे रूक्षे वान्यात्र संशयः॥ ॥इतिमकरः॥ ॥अथकुंभराशिगुणः॥ ॥उद्योगीरूक्षदेहो पृथुकर
चरणो मद्यमानेभसक्तः सद्देहो धर्महीनः परस्फ़नजनकः स्थूलदेहः कुनेत्रः॥ शाठ्यो लुस्याभिभू
तो विपुलसुखकटिः शिल्पविद्यास्फ़पूज्यो दुःशीलो दुःखयुक्तो घटमृदुपगते शेशिनाथे दरिद्रः॥१॥
॥ ॥इतिकुंभराशिगुणः॥ ॥अथमीनराशिगुणः॥ शिष्ट्योत्क्यासहिवादैः प्रियजनरहितः शास्त्र
विद्वर्तदेहो गेयज्ञो धर्मनिष्ठो बहुयुवति युतः सौख्यभाक् भूपसेवी॥ ईषत्कोपो नमर्षः सुखनिधिधन 
भाक् स्त्रीजितः शुद्धभावो यानासक्तः समुद्रे तिमियुगलगते शीतगो दानशीलः॥ ॥इतियवनजा॰ 

तकेमीनराशिगुणः॥ अथग्रहभावफलानि॥ ॥दुःखंसुखंतथोद्वेगःकांतिःसौख्यंधनंतथा॥दुः
खंहानिस्तथादुःखं लग्नेरव्यादिकंफलं॥१॥दुःखंधनंतथा हानिः सौख्यं लाभंधनंतथा॥हानि
र्नाशस्तथादुःखंधनेरव्यादिकंफलं॥ २॥ सौख्यंकार्यमहान्कोपः सिद्धिः सौख्यंप्रियासुखं॥
हानिर्दुःखंतथादुःखंतृतीयेफलमीरितं॥३॥ दुःखंसुखंतथा हानिःसुखंसौख्यंतथाधनं॥दुः
खंदुःखंतथादुःखंसुहृत्स्थानेफलंस्मृतं॥४॥ दुःखंसुखंतथादुःखंपुत्रंद्रव्यंतथाधनं॥दुःखं
दुःखंतथादुःखंपुत्रस्थानेफलंस्मृतं॥५॥ सुखंदुःखंसुखंदुःखंसुखंदुःखंसुखंदुःखं॥ सुखंचै
वैरिपुस्थानेग्रहाणांफलमीरितं॥६॥ हानिसुखंतथादुःखंसुखंमानसुखंतथा॥ दुःखंहानिस्तथा
दुःखंजायास्थानेफलंभवेत्॥७॥ सूर्यादिनवखेटास्यमृत्युस्थानेयदातदा॥विरुद्धंफलमेवस्या
न्नात्रकार्याविचारणा॥८॥अत्रअष्टमस्थानेशुभग्रहाश्चेत्तदाकिंचिदिष्टफलं॥ दुःखंसुखंतथादुः
खंसुखंसौख्यंसुखंतथा॥दुःखंहानिस्तथादुःखंधर्मस्थानेफलंस्मृतं॥९॥ दुःखंसुखंतथा

य.जा. दुःखंसुखंमानस्तथासुखं॥दुःखंदुःखंमानहानिःकर्मस्थानेफलंस्मृतं॥१०॥राजमानोबहुध
१७ नंराजसौख्यंशुभंशुभं॥धनेकीर्तिःसुकीर्तिश्चयशआयेफलंस्मृतं॥११॥विशालनेत्रकाणश्च
पापंदारिद्र्यमेवच॥कृशोऽस्ययस्तीव्रताचतीव्रस्तीव्रोव्ययस्मृतं॥१२॥ ॥इतिग्रहभावफलानि॥
॥ ॥खचरस्यभुक्तभोग्यभागाःरस ६०घ्नागतिभाजिताः क्रमेण॥यातैष्यदिनैःप्रयातिराशिं
खचरेवक्रिणितत्क्रमाद्विलोमं॥१॥खचर गोग्रह उसका भुक्त अथवा भोग्य से भागलेकर खरस
जो ६० उससेगुणना औरग्रह केगतीसे भागदेना जोलब्धी दिवसघटी आवे उसदिनघटी सेजो
दिवसकी गणना होय उसीसेग्रह पीछे अथवा आगे केराशीमेजायगा पीछे ग्रहचलेतो
आगेकी क्रिया भी उसीतरहसे करना॥ ॥ ॥देवब्राह्मणवंदनात्गुरुवचःसंपादनात्प्र
त्यहंसाधूनामभिभाषणात्श्रुतिरवःश्रेयःकथाकर्णनात्॥होमाद्ध्वरदर्शनात्शुचिमनोभावाज्ज राम.
पादानतोनोकुर्वंतिकदाचिदेवपुरुषस्यैवंग्रहाःपीडनं॥१॥पापिष्ठायेदुराचारादेवब्राह्मणनिंद १७

Indira Gandhi National Centre for the Arts

कः॥ अपथ्यभोजनस्तेषामकालमरणं ध्रुवं॥२॥ येपथ्यभोजनरता०॥ ॥अथपत्रिकाक्रमः॥ ॥
॥आशीर्वादश्लोक॥ ॥जन्मकालः॥ ॥प्राकृतजन्म॥ ॥यात्रादौवर्ज्ये॥ जानस्वजंनोःष
ट्धिष्ण्यानि॥ तत्कालिकाग्रहः॥ ग्रहजापकालार्थजन्मकुंडली॥ ॥ अथभावफलानि॥ ॥
॥पंचांगफलानि॥ ॥ अष्टोत्तरीदशानुक्रमः॥ ॥ इतियवनजातकंसमाप्तं॥ ॥ शुभम्॥ ॥
वाराणसीप्रसादस्यनियोगेनप्रयत्नतः॥ काशीसंस्कृतमुद्राप्यामंकितोयंशिलाक्षरैः॥१॥ श्रीका
शीजीमेज्ञानवापीकेपूर्वफाटकपरश्रीविश्वनाथजीकेपासमहाराजशिवलाल दुबेजीकेमकानमे
काशीसंस्कृतमुद्रायन्त्रमेछपीजिनकोलेनाहोयउन्होनेइसछापेखानेकेकार्यसंपादकश्रीयुत
बाबूवाराणसीप्रसादयाकचौरीगलीमेभाईप्रताप सिंहजीकेदुकानपरमिलेगी ॥ छ ॥ छ ॥

॥मितिकार्तिककृष्णत्रयोदशी१३भृगुवासरेसमाप्तः॥

संवत्१९३१शके१७९५

इतियवनजातकंसमाप्तम्

Indira Gandhi National
Centre for the Arts

IGNCA RAR
R-246
ACC. No.

Indira Gandhi National
Centre for the Arts